नं० १०२२-घ

महाभारते भीष्मस्तवराजः (महाभारतम्)

पत्राणि ५ (सम्पूर्णम्)

नं० १०२२-घ

५ पत्राणि

५/० पत्रे

भी० श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय जनमेजयोवाच शरतल्पेशयानस्तुभरत
१ नांपितामहः कथमुत्सृष्टवान्देहं कंयोगमधारयत् १ वैशंपायनोवाच शृणुष्वाव
हितोराजन्शुचिर्भूत्वासमाहितः भीष्मस्तुकुरुशार्दूलदेहोत्सर्गममाभ्ययत् २ निवर्त
मानेत्वयनेउत्तरेवैदिवाकरे समावेशयदात्मानमात्मन्येवसमाहितः ३ शुक्लपक्षस्य
चाष्टम्यांमाघमासस्यपार्थिव प्राजापत्येचनक्षत्रेमध्यंप्राप्तेदिवाकरे ४ विकीर्णांशुरि
वादित्योभीष्मःशरशतैश्चितः शुशुभेपरयालक्ष्म्यावृतोब्राह्मणसत्तमैः ५ व्यासेनवेदश्र
वसानारदेनसुरर्षिणा देवस्थानेनवात्स्येनतथास्माकंसुमंतुना ६ तथाजैमिनिनाचै
वपैलेनचमहात्मना शांडिल्यगौतमात्रेयैर्भारद्वाजेनधीमता ७ शौव्येनयाज्ञवल्क्येन
शंखेनलिखितेनच देवरातेनधीरेणदक्षमत्स्यत्रिशौनकैः ८ एतैश्चान्यैर्मुनिगणैर्म
हाभागैर्महात्मभिः श्रद्धानैःपुरस्कारैर्वृतश्चंद्रइवग्रहैः ९ भीष्मस्तुपुरुषव्याघ्रःकर्म
णामनसागिरा शरतल्पगतःकृष्णंप्रदध्यौप्रांजलिःशुचिः १० स्वरेणहृष्टपुष्टेनतुष्टा
वमधुसूदन योगेश्वरंपद्मनाभंविष्णुंजिष्णुंजगत्पतिं ११ कृतांजलिपुटोभूत्वावाग्वि
दांप्रवरःप्रभुः भीष्मपरमधर्मात्मावासुदेवमथास्तुवन् १२ भीष्मउवाच आराधया।
म्यहंविष्णुंवाचाजिगदिवाम्यहं तयाव्याससमासिन्याप्रीयतांपुरुषोत्तमः १३ शुचिंशु
चिपदंहंसंतत्परंपरमेष्ठिनं युक्तसर्वात्मनात्मानंप्रपद्येतंप्रजापतिं १४ अनाद्यंतंपरं १
ब्रह्मदेवानषंतयोविदुः एकोयंवेदभगवान्धाताणारायणोहरिः १५ नारायणमृषिग

णास्तथा सिद्धमहोरगाः देवा देवर्षयश्चैव यं विदुर्दुःखभेषजं १६ अस्य विश्वस्य गंधर्वा यक्षरा
क्षसकिन्नराः यं न जानंति को ह्येष कुतो वा भगवानिति १७ यस्मिन्विश्वानि भूतानि ति
ष्ठंति च विशंति च गुणभूतानि भूतेशे सूत्रे मणिगणा इव १८ अस्य विश्वस्य कर्त्तासौ।
जगतस्तस्थुषां पतिः वदंति जगतोध्यक्षमध्यात्मपरिचिंतकाः १९ यस्मिन्नित्यं ततं तं
तौ दृढे स्रगिव तिष्ठति सदसद्ग्रथितं विश्वं विश्वांगे विश्वकर्मणि २० हरिं सहस्रशिरसं।
सहस्रकमलेक्षणं सहस्रबाहुमुकुटं सहस्रवदनोज्वलं २१ प्राहुर्नारायणं देवं यं विश्व
स्य परायणं अणीयसामणीयांसं स्थविष्ठं च स्थवीयसां २२ गरीयसां गरिष्ठं च श्रेष्ठं च
श्रेयसामपि यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च २३ गृणंति सत्यकर्माणं सत्यं
सत्येषु सामसु चतुर्भिश्चतुरात्मानं सत्वस्थं सात्वतां पतिं २४ यं दिव्यैर्देवमर्चंति गुह्यैः
परमनामभिः यस्मिन्नित्यं तपस्तप्तं यदंगेष्वनुतिष्ठति २५ सर्वात्मा सर्ववित्सर्वः सर्वगः
सर्वभावनः यं देवं देवकी देवी वसुदेवादजीजनत् २६ भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्नि।
मिवारणिः यमनन्यो व्यपेताशीरात्मानं वीतकल्मषं २७ दृष्ट्वानंत्याय गोविंदं पश्यंत्यात्मा।
त्मानमात्मनि अतिवाय्विंद्रकर्माणमतिसूर्याग्नितेजसं २८ अतिबुद्धींद्रियात्मानं तं प्र
पद्ये प्रजापतिं पुराणे पुरुषं प्रोक्तं ब्रह्म प्रोक्तं युगादिषु २९ क्षये संकर्षणं प्रोक्तं तमुपास्य
मुपास्महे यमेकं बहुधात्मानं प्रादुर्भूतमधोक्षजं ३० नान्यभक्ताः क्रियावंतो यजंते सर्व
कामदं यमाहुर्जगतः कोशं यस्मिन्सन्निहिताः प्रजाः ३१ यस्मिन्लोकाः स्फुरंतीमे जलेश।

भी० कृनयोयथा ऋतमेकाक्षरंब्रह्मयत्तत्सदसतःपरं ३२ अनादिमध्यपर्यंतंनदेवानर्षयोविदुः।
२ यंसुरासुरगंधर्वाःससिद्धर्षिमहोरगाः ३३ प्रयतानित्यमर्चंतिपरमंदुःखभेषजा अनादि
2 निधनंदेवमात्मयोनिंसनातनं ३४ अप्रतर्क्यमविज्ञेयंहरिंनारायणंविभुं यंवैविश्वस्य
कर्तारंजगतस्तस्थुषांपतिं ३५ वदंतिजगतोध्यक्षमध्यात्मपरिचिंतकाः हिरण्यवर्णंयं
गर्भमदितेर्दैत्यनाशनं ३६ एकंद्वादशधाजज्ञेतस्मैसूर्यात्मनेनमः ३७ शुक्लेदेवान्पितॄन्
कृष्णेतर्पयत्यमृतेनयः यश्चराजाद्विजातीनांतस्मैसोमात्मनेनमः ३८ यद्बृहत्तंबृहत्युक्तंय
मग्निंचमहाध्वरे यंविप्रसंघागायंतितस्मैवेदात्मनेनमः ३९ महतस्तमसःपारेपुरुषंह्य
तितेजसं यंज्ञात्वामृत्युमत्येतितस्मैज्ञानात्मनेनमः ४० ऋग्यजुःसामधामानंदशार्धह
विःसाकृतिं यंसप्ततंतुंतन्वंतितस्मैयज्ञात्मनेनमः ४१ यःसुपर्णोयजुर्नामछंदोगात्रस्त्रि
वृच्छिराः रथंतरंबृहत्सामतस्मैस्तोत्रात्मनेनमः ४२ यःसहस्रसवेयज्ञेयज्ञोविश्वंसृजं
न्नृषिः हिरण्यवर्णःशकुनिंतस्मैतार्क्ष्यात्मनेनमः ४३ पदांगसंधिपर्वाणंस्वरव्यंजनभूष
णं यमाहुरक्षरंनित्यंतस्मैवागात्मनेनमः ४४ येपृथग्धर्मचरणाःपृथग्धर्मफलैषिणः
पृथग्धर्मैःसमर्चंतितस्मैधर्मात्मनेनमः ४५ यःचिनोतिसतांसेतुमृतेनामृतयोनिना
धर्मार्थव्यवहारांगैस्तस्मैसत्यात्मनेनमः ४६ हुताशनमुखैर्देवैर्धार्यतेसकलंजगत्।
हविःप्रथमभोक्तारंतस्मैभोक्त्रात्मनेनमः ४७ यंव्यक्तस्थितमव्यक्तंविचिन्वंतिमहर्षयः
क्षेत्रक्षेत्रज्ञमासीनंतस्मैक्षेत्रात्मनेनमः ४८ यंत्रिधात्मानमात्मस्थंवृतंषोडशभिर्गुणैः। २

प्राहुः सप्तदश्रं सांख्यास्तस्मै सांख्यात्मने नमः ४९ यं विनिद्रा जितश्वासा शान्ता दान्ता जितेन्द्रि
याः ज्योतिः पश्यन्ति युंजानास्तस्मै योगात्मने नमः ५० अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः
शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ५१ यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षि
तिः सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः ५२ संभक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत्
बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः ५३ योसौ युगसहस्रान्ते प्रदीप्तार्चिर्विभावसुः।
संभक्षयति भूतानि तस्मै घोरात्मने नमः ५४ अजस्य नाभौ संभूतं यस्मिन्विश्वं प्रतिष्ठितं॥
पुष्करं पुष्कराक्षस्य तस्मै पद्मात्मने नमः ५५ सहस्रशिरसे चैव पुरुषायामितात्मने चतुः
समुद्रपर्याय योगनिद्रात्मने नमः ५६ भूतं भव्यं भविष्यं च भूतानां प्रभुरव्ययः यो ग्रजः स
र्वभूतानां तस्मै भूतात्मने नमः ५७ यस्य केशेषु जीमूता नद्यः सर्वांगसंधिषु कुक्षौ समुद्रा
श्चत्वारस्तस्मै तोयात्मने नमः ५८ ब्रह्मा वक्त्रं भुजौ क्षत्रं कृत्स्नमूरुदरं विशः पादौ यस्या
श्रिताः शूद्रास्तस्मै वर्णात्मने नमः ५९ अन्नपानेन्धनमयो रसप्राणविवर्धनः यो धारय
ति भूतानि तस्मै प्राणात्मने नमः ६० यं घृतो जाठरश्चैव पावकः शुचिरेव च दहनः सर्वभ
क्ष्याणां तस्मै वह्न्यात्मने नमः ६१ विषये वर्तमानानां यं ते वैशेषिकैर्गुणैः प्राहुर्विषयगो
प्तारं तस्मै गोप्त्रात्मने नमः ६२ ज्वलनार्केन्दुताराणां ज्योतिषां दिव्यरूपिणां यस्तेजयसि
तेजांसि तस्मै तेजात्मने नमः ६३ अप्रमेयशरीराय सर्वतोबुद्धिचक्षुसे अपारपरिमाणा
य तस्मै दिव्यात्मने नमः ६४ युगेष्वावर्तते योंसौ दिवसायनहायनैः स्वर्गप्रलययोः कर्ता

भी० ३ तस्मै कालात्मनेनमः ६५ परःकालात्परोयज्ञात्परःसदसतश्चयः अनादिरादिर्विश्वस्यत
स्मै विश्वात्मनेनमः ६६ आत्मज्ञानमिदंज्ञानंज्ञात्वात्वायंचव्यवस्थितं यंज्ञानेनाधिगच्छंतितस्मै
ज्ञानात्मनेनमः ६७ जटिनेदंडिनेनित्यंलंबोदरशरीरिणे कमंडलुनिषंगायतस्मैब्रह्मात्म
नेनमः ६८ शंखिनेगदिनेचैवशार्ङ्गिणेपीतवाससे वनमालाधरायैवतस्मैकृष्णात्मने
नमः ६९ भस्मस्निग्धशरीरायव्याघ्रचर्मनिवासिने त्रिशूलडमरूहस्तायतस्मैरुद्रात्म
नेनमः ७० शिरःकपालमालायव्याघ्रचर्मनिवासिने भिक्षोदनशरीरायतस्मैतुर्यात्मने
नमः ७१ योमोहयतिभूतानिस्नेहपाशानुबंधनैः सर्गस्यरक्षणार्थायतस्मैमोहात्मनेन
मः ७२ पंचभूतात्मभूतायभूतानांनिधनायच अक्रोधक्रोधमोहायतस्मैशांतात्मनेनमः
७३ यःशेतेक्षिरपर्यंके दिव्यनागविभूषिते फणाःसहस्रारचितेतस्मैनिद्रात्मनेनमः ७४
नदेवानचगंधर्वानदैत्यानचदानवाः नविदुर्यस्यतत्वंहितस्मैतत्वात्मनेनमः ७५ विश्वा
यमरुतेचैवरुद्रादित्याश्विनायच वसवःसिद्धसाध्याश्चतस्मैदेवात्मनेनमः ७६ अव्य
क्तबुद्ध्यहंकारमनोभूतेंद्रियाणिच तन्मात्राणिविशेषाश्चतस्मैतत्वात्मनेनमः ७७ यंहिसू
क्ष्मंविचिन्वंतियेतुसूक्ष्मविदोजनाः सूक्ष्मतत्वमिदंब्रह्मतस्मैसूक्ष्मात्मनेनमः ७८ सुरूपा
त्रिमुनिःपूर्वेऋषयःपरदेहिनः यस्यगात्रेषुसंभूतास्तस्मैरक्षात्मनेनमः ७९ तारामयेकाल
नेमिंहत्वादानवपुंगवं ददौराज्यंमहेंद्रायतस्मैभक्तात्मनेनमः ८० आब्रह्मस्तंबपर्यंतंज
गत्सर्वंकरोतियः यस्मादुत्पद्यतेदेहितस्मैबीजात्मनेनमः ८१ मत्स्यरूपमहोरूत्वावे ३

3

दानाहृत्य वेधसे रसातलं ददौय[illegible]भ्यत तस्मै मत्स्यात्मने नमः ८२ क्षीराब्धौ कमठरूपो यत्पृष्ठे
तामृतमंथने दधानो मंदरं तुंगं तस्मै कूर्मात्मने नमः ८३ वाराहं रूपमास्थाय महिं सवनप
र्वतां उज्जहारैकदंष्ट्राग्रे तस्मै क्रोडात्मने नमः ८४ नारसिंहवपुर्भूत्वा सर्वलोकभयंकरं हि
रण्यकशिपुं जघ्ने तस्मै सिंहात्मने नमः ८५ पिंगेक्षणसदंष्ट्रस्य रूपं दंष्ट्रानखायुधे दान
वेंद्रांतकरणं तस्मै दृप्तात्मने नमः ८६ वामनं रूपमास्थाय बलिं संयस्य मायया त्रैलोक्यं
क्रांतवान्यस्तु तस्मै क्रांतात्मने नमः ८७ जमदग्निसुतो भूत्वा रामः परशुमान्रणे जघान का
र्त्तवीर्यं दीनं तस्मै रामात्मने नमः ८८ त्रिः सप्तकृत्वो यश्चैको धर्मव्युत्क्रांतगौरवान् जघान
क्षत्रियान्संख्ये तस्मै कोपात्मने नमः ८९ त्रिः सप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा॥
कश्यपाय महिं प्रादात्तस्मै घोरात्मने नमः ९० रामो दाशरथिर्भूत्वा सेतुं कृत्वा महोदधौ ज
घान राक्षसेंद्रादीन्तस्मै क्षत्रात्मने नमः ९१ चक्रिणा गदिने नित्यं लांगलायुधधारिणे॥
अनंतबलदेवाय तस्मै भद्रात्मने नमः ९२ यो हली मुसली श्रीमान्नीलांबरधरः शुचिः रा
माय रोहिणेयाय तस्मै योग्यात्मने नमः ९३ दानवान्मवशीकृत्वा पुनर्बुद्धत्वमागतः धर्म
स्य रक्षणायैव तस्मै बुद्धात्मने नमः ९४ ब्राह्मणस्य सुतो भूत्वा कल्किरूपेण यो हरी कल्यो
तेहं हरेत्सर्वं तस्मै कल्क्यात्मने नमः ९५ देवकीनंदनः श्रीमान्सुरान्नंदयते विभुः क्रुधितो
भस्मतं दध्रे तस्मै कृष्णात्मने नमः ९६ वसुदेवसुतो भूत्वा कृष्णात्मानं दगोकुले कंसस्यत
वधार्थाय तस्मै क्रीडात्मने नमः ९७ क्षत्रियाणां सहस्राणि प्रसुतास्वर्बुदानि च यो वधी[illegible]

रवेपुरे तस्मै क्रीडात्मनेनमः ९८ यः सर्वप्राणिनांप्राणः साक्षिरूपोव्यवस्थितः अक्षरक्ष
रमाणायतस्मै सांख्यात्मनेनमः ९९ रसातलगतःश्रीमाननंतोभगवान्हरिः सर्वंधारयते
योसौतस्मै शेषात्मनेनमः १०० यस्मिन्सर्वंयतःसर्वंयः सर्वंसर्वतश्चयः यश्चसर्वमयोदे
वतस्मै सर्वात्मनेनमः १ विश्वकर्मन्नमस्तेस्तु विश्वात्माविश्वसंभवः अपवर्गोसिभूता
नांपंचानांपरतस्थितः २ नमस्तेत्रिषुलोकेषु नमस्तेपरतस्त्रिषु नमस्तेसर्वदीक्षासुत्वं
हिसर्वपरायणः ३ नमस्तेभगवन्विष्णो लोकानांप्रभवाप्ययं त्वंहिकर्ताहृषीकेशसंह
र्ताचापराजितः ४ येनपश्यामितेभावान् दिव्यान्हित्रिषुवर्त्मसु तन्नपश्यामितत्वेनय
त्तेरूपंसनातनं ५ द्यौश्चतेशिरसाव्याप्तापद्भ्यांदेवीवसुंधरा विक्रमेणत्रयोलोकाःपु
रुषोसिसनातनः ६ अतसीपुष्पसंकाशंपीतवाससमच्युतं येनमस्यंतिगोविंदंनते
षांविद्यतेभयं ७ नारायणःपरंब्रह्मनारायणःपरंतप नारायणःपरंसर्वंनारायणः
परात्परं ८ यथाविष्णुमयंसत्यंयथाविष्णुमयंहविः यथाविष्णुमयंसर्वंपापंनाश
यतेतथा ९ त्वांप्रपन्नायभक्तायगतिमिष्टांजिगीषते यच्छ्रेयःपुंडरीकाक्षसंध्यायस्व
स्वरेश्वर १० इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः वाग्यज्ञेनार्चितोदेवःप्रीयतां।
मेजनार्दनः ११ वैशंपायनउवाच एतावदुक्त्वावचनंभीष्मस्तद्गतमानसः नमस्कृत्यै।
वकृष्णायप्रयाणमकरोत्तदा १२ अभिगम्यतुयोगेनभक्तिंभीष्मस्यमाधवः त्रैलोक्य
दर्शनज्ञानंदिव्यंदत्त्वाययौहरिः १३ तस्मिन्नुपरतेदेवेततस्तेब्रह्मवादिनः भीष्मंचरा ४

भी० तर्कैः सर्वैप्रशंसेतेपुनःपुनः १४ भीष्मंचाभिभ्यासकंठं प्रशशंसुर्महामतिं तेस्तुवंतश्चविप्रा
५ ग्र्याः केशवंपुरुषोत्तमं १५ विदित्वाभक्तियोगंतं भीष्मस्यपुरुषोत्तमः सहसोत्थायसंहृष्टोभी
ष्ममेवाभ्यपद्यत १६ केशवः सात्यकिश्चैवरथेनैकेनजग्मतुः अपरेणमहात्मानौयुधिष्ठि
रधनंजयौ १७ भीमसेनोयमौचोभौरथमेकंसमाश्रितौ कृपोयुयुत्सुः सूतश्चसंजयश्चा
परंरथं १८ तेरथैर्गगनाकारैः प्रयाताःपुरुषर्षभाः तेनघोषेणमहताकंपयंतोवसुंधरां।
१९ ततोगिरःपुरुषवरस्तवान्विताः सुरादिभिःपथिसुमनाःप्रसुश्रुवे कृतांजलिंप्रणतमथा
परंजनंसकेशवोमुदितमनाःसवाहतः २० अनादिनिधनंदेवमप्रमेयपराक्रमं लोकाध्य
क्षंस्तुवंन्नित्यंसर्वपापैःप्रमुच्यते २१ कृष्णेरताःकृष्णमनुस्मरंतिरात्रौचकृष्णंपुनरुत्थिता
ये तेभिन्नदेहाःप्रविशंतिकृष्णंहविर्यथामंत्रहुतंहुताशे २२ शुक्लपक्षेदिवाभूमौगंगायां
चोत्तरायणे धन्यास्तातमरिष्यंतिहृदयस्थेजनार्दने २३ योगिनः प्राणवियोगकालेयं
त्वेकचित्तेविनिवेशयंति साक्षात्पुरस्ताद्धरिमीक्षमाणः प्राणान्जहौप्राप्तकालोहिभीष्मः
२४ इतिस्तवंयःपठतिशार्ङ्गधन्वनः शृणोतिवायदुकुलनंदनस्तवं सचक्रधृग्विहतकि
ल्बिषोजनोजनार्दनंप्रविशतिदेहसंक्षये २५ सुसितनिशितधारंयस्यचक्रंकराग्रेमणि
कलिकविचित्रेकुंडलेयस्यकर्णे अमरशतसहस्रैः सेव्यतेयस्यमालासुरकुलनिहंता
प्रीयतांवासुदेवः २६ स्तवराजःसमाप्तोयविष्णोरद्भुतकर्मणः गांगेयेनपुरागीतोमहापा
तकनाशनः २७ इतिश्रीमहाभारतेशतसहस्रसंहितायांवैयासिक्यांशांतिपर्वणिश्रीभी ५
ष्मस्तवराजसमाप्त शुभंभवतु

5